बगलामुखी सहस्त्रनाम स्तोत्रम्

सुरालयप्रधाने तु देव - देवं महेश्वरम् ।
शैलाधिराज - तनया संग्रहे तमुवाच ह ।।1।।

श्रीदेव्युवाच

परमेष्ठिन् ! परंधाम ! परमेश्वर ! ।
नाम्नां सहस्रम्बगलामुख्याऽद्याब्रूहि बल्लभ ।।2।।

ईश्वर उवाच

शृणु देवि ! प्रवक्ष्यामि नामधेयं सहस्त्रकम् ।
परब्रह्मास्त्र - विद्यायाश्चतुर्वर्ग - फलप्रदम् ।।3।।
गुह्यादगुह्यतरं देवि ! सर्वसिद्धैक वन्दितम् ।
अतिगुप्ततरा विद्या सर्वतन्त्रेषु गोपिता ।।4।।
विशेषतः कलियुगे महासिद्धयौघदायिनी ।
गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः ।।5।।
अप्रकाश्यमिदं सत्यं स्वयोनिरिव सुव्रते ! ।
रोधिनी विघ्नसंघानां मोहिनी परयोषिताम् ।।6।।
स्तम्भिनी राजसैन्यानां वादिनी परवादिनाम् ।
पुरा चैकार्णवे घोरे काले परमभैरवः ।।7।।
सुन्दरीसहितो देवः केशवः क्लेशनाशनः ।
उरगासनमासीनो योगनिद्रामुपागतम् ।।8।।
निद्राकाले च ते काले मया प्रोक्तः सनातनः ।
महास्तम्भकरंदेवि स्तोत्रं वा शतनामकम् ।।9।।

श्रीभगवानुवाच

सहस्त्रनामपरमं वद देवस्य कस्यचित् ।
शृणु शङ्कर देवेश ! परमातिरहस्यकम् ।।10।।
अजोऽहं यत्प्रसादेन विष्णुः सर्वेश्वरेश्वरः ।
गोपनीयं प्रयत्नेन प्रकाशात्सिद्धिहानिकृत् ।।11।।

विनियोगः

ॐ अस्य श्रीपीताम्बरीसहस्त्रनामस्तोत्रमन्त्रस्य भगवान्सदाशिवऋषि-रनुष्टुप्छन्दः श्रीजगद्वश्यकरी पीताम्बरीदेवता सर्वाभीष्टसिद्धर्थे जपे विनियोगः ।

अथ ध्यानम्

पीताम्बरीपरीधानां पीनोन्नतपयोधराम् ।
जटामुकुटशोभाढ्याम्पीत - भूमिसुखासनाम् ।।12।।
शत्रोर्जिह्वां मुद्गरञ्च बिभ्रतीं परमाङ्कलाम् ।
सर्वागमपुराणेषु विख्याताम्भुवनत्रये ।।13।।
सृष्टिस्थितिविनाशानामादिभूतां महेश्वरीम् ।
गोप्यां सर्वप्रयत्नेन शृणु तां कथयामि ते ।।14।।
जगद्विध्वंसिनीं देवीमजरामरकारिणीम् ।
तां नमामि महामायां महदैश्वर्यदायिनीम् ।।15।।
प्रणवम्पूर्वमुद्धृत्य स्थिरमायान्ततो वदे ।
बगलामुखीसर्वेति दुष्टानां वाचमेव च ।।16।।
मुखंपदं स्तम्भयेति जिह्वाङ्कीलय बुद्धिमत् ।
विनाशयेति तारञ्च स्थिरमायांततो वदेत् ।।17।।
वह्निप्रियांततो मन्त्रश्चतुर्वर्गफलप्रदः ।

अथ सहस्त्रनाम

ब्रह्मास्त्रं ब्रह्मविद्या च ब्रह्ममाता सनातनी ।।18।।
ब्रह्मेषी ब्रह्मकैवल्यबगला ब्रह्मचारिणी ।
नित्यानन्दा नित्यसिद्धा नित्यरूपा निरामया ।।19।।
सन्धारिणी महामाया कटाक्षक्षेमकारिणी ।
कमला विमला नीला रत्नकान्तिगुणाश्रिता ।।20।।
कामप्रिया कामरता कामकामस्वरूपिणी ।
मङ्गला विजया जाया सर्वमङ्गलकारिणी ।।21।।
कामिनी कामिनीकाम्या कामुका कामचारिणी ।
कामप्रिया कामरता कामाकामस्वरूपिणी ।।22।।
कामाख्या कामबीजस्था कामपीठनिवासिनी ।
कामदा कामहा काली कपाली च करालिका ।।23।।

कंसारिः कमला कामा कैलासेश्वरवल्लभा ।
काम्यायनी केशवा च करुणा कामकेलिभुक् ।।24।।
क्रियाकीर्तिः कृत्तिका च काशिका मधुरा शिवा ।
कालाक्षी कालिका काली धवलाननसुन्दरी ।।25।।
खेचरी च खमूर्त्तिश्च क्षुद्राऽक्षुद्रक्षुधावरा ।
खड्गहस्ता खड्गरता खड्गिनी खर्परप्रिया ।।26।।
गङ्गा गौरी गामिनी च गीता गोत्रविवर्द्धिनी ।
गोधरा गोकरा गोधा गन्धर्वपुरवासिनी ।।27।।
गन्धर्वा गन्धर्वकला गोपनी गरुडासना ।
गोविन्दभावा गोविन्दा गान्धारी गन्धमादिनी ।।28।।
गौराङ्गी गोपिकामूर्त्तिर्गोपी गोष्ठनिवासिनी ।
गन्धा गजेन्द्रगामान्या गदाधरप्रियाग्रहा ।।29।।
घोरघोरा घोररूपा घनश्रोणी घनप्रभा ।
दैत्येन्द्रप्रबला घण्टावादिनी घोरनिःस्वना ।।30।।
डाकिन्युमा उपेन्द्रा च उर्वशी उरगासना ।
उत्तमा उन्नता उन्ना उत्तमस्थानवासिनी ।।31।।
चामुण्डा मुण्डिका चण्डी चण्डदर्पहरेति च ।
उग्रचण्डा चण्डचण्डा चण्डदैत्यविनाशिनी ।।32।।
चण्डरूपा प्रचण्डा च चण्डा चण्डशरीरिणी ।
चतुर्भुजा प्रचण्डा च चराऽचरनिवासिनी ।।33।।
क्षत्रप्रायशिरोवाहा छला छलतरा छली ।
क्षत्ररूपा क्षत्रधरा क्षत्रियक्षयकारिणी ।।34।।
जया च जयदुर्गा च जयन्ती जयदा परा ।
जायिनी जयिनी ज्योत्स्ना जटाधरप्रियाजिता ।।35।।
जितेन्द्रिया जितक्रोधा जयमाना जनेश्वरी ।
जितमृत्युर्जरातीता जाह्नवी जनकात्मजा ।।36।।
झङ्कारझञ्झरी झण्डा झङ्कारी झकशोभिनी ।
झखा झमेशा झङ्कारी योनिकल्याणदायिनी ।।37।।
झञ्झरा झमुरी झारा झरा झरतरापरा ।
झञ्झा झमेता झङ्कारी झण्ा कल्याणदायिनी ।।38।।
ईमना मानसी चिन्त्या ईमुना शङ्करप्रिया ।
टङ्कारी टिटिका टीका टङ्किनी च टवर्गगा ।।39।।
टापाटोपा टटपतिष्टमनी टमनप्रिया ।
ठकारधारिणी ठीका ठङ्करी ठिकरप्रिया ।।40।।
ठेकठासा ठकरती ठामिनी ठमनप्रिया ।
डारहा डाकिनी डारा डामरा डामरप्रिया ।।41।।
डखिनी डडयुक्ता च डमरूकरवल्लभा ।
ढक्का ढक्की ढक्कनादा ढोलशब्दप्रबोधिनी ।।42।।
ढामिनी ढामनप्रीता ढगतन्त्रप्रकाशिनी ।
अनेकरूपिणी अम्बा अणिमासिद्धिदायिनी ।।43।।
आमन्त्रिणी अणुकरी अणुमद्भानुसंस्थिता ।
तारा तन्त्रावती तन्त्रा तत्त्वरूपा तपस्विनी ।।44।।
तरङ्गिणी तत्त्वपरा तन्त्रिका तन्त्रविग्रहा ।
तपोरूपा तत्त्वदात्री तपप्रीतिप्रघर्षिणी ।।45।।
तन्त्रा यन्त्रार्चनपरा तलातलनिवासिनी ।
तल्पदा स्वल्पदा कामा स्थिरा स्थिरतरा स्थितिः ।।46।।
स्थाणुप्रिया स्थितिपरा लता स्थानप्रदायिनी ।
दिगम्बरा दयारूपा दावाग्निदमनी दमा ।।47।।
दुर्गा दुर्गपरा देवी दुष्टदैत्यविनाशिनी ।
दमनप्रमदा दैत्यदयादानपरायणा ।।48।।
दुर्गात्तिंनाशिनी दान्ता दम्भिनी दम्भवर्जिता ।
दिगम्बरप्रिया दम्भा दैत्यदम्भविदारिणी ।।49।।
दमना दशनसौन्दर्या दानवेन्द्रविनाशिनी ।
दयाधरा च दमनी दर्भपत्रविलासिनी ।।50।।
धरिणी धारिणी धात्री धराधरधरप्रिया ।
धराधरसुता देवी सुधर्मा धर्मचारिणी ।।51।।
धर्मज्ञा धवला धूला धनदा धनवर्द्धिनी ।
धीराधीरा धीरतरा धीरसिद्धिप्रदायिनी ।।52।।
धन्वन्तरिधरा धीरा ध्येया ध्यानस्वरूपिणी ।
नारायणी नारसिंही नित्यानन्दनरोत्तमा ।।53।।
नक्ता नक्तवती नित्या नीलजीमूतसिन्नभा ।
नीलाङ्गी नीलवस्त्रा व नीलपर्वत वासिनी ।।54।।
सुनील पुष्प-खचिता नील-जम्बुसम-प्रभा ।
नित्याख्या षोडशी विद्या नित्या नित्यसुखावहा ।।55।।
नर्मदा नन्दना नन्दा नन्दाऽऽनन्दविवर्द्धिनी ।
यशोदा नन्दतनया नन्दनोद्यानवासिनी ।।56।।
नागान्तका नागवृद्धा नागपत्नी च नागिनी ।
नमिताशेषजनता नमस्कारवती नमः ।।57।।
पीताम्बरा पार्वती च पीताम्बरविभूषिता ।
पीतमाल्याम्बरधरा पीताभा पिङ्गमूर्द्धजा ।।58।।
पीतपुष्पार्चनरता पीतपुष्पसमर्चिता ।
परप्रभा पितृपतिः परसैन्यविनाशिनी ।।59।।
परमा परतन्त्रा च परमन्त्रा परात्परा ।
पराविद्या परासिद्धिः परस्थानप्रदायिनी ।।60।।
पुष्पा पुष्पवती नित्या पुष्पमालाविभूषिता ।
पुरातना पूर्वपरा परसिद्धिप्रदायिनी ।।61।।
पीता नितम्बिनी पीता पीनोन्नतपयस्विनी ।
प्रेमा प्रमध्यमा शेषा पद्मपत्रविलासिनी ।।62।।
पद्मावती पद्मनेत्रा पद्मा पद्ममुखी परा ।
पद्मासना पद्मप्रिया पद्मरागस्वरूपिणी ।।63।।
पावनी पालिका पात्री परदा वरदा शिवा ।
प्रेमसंस्था परानन्दा परब्रह्मस्वरूपिणी ।।64।।
जिनेश्वरप्रिया देवी पशुरक्तरतप्रिया ।
पशुमांसप्रिया पर्णा परामृतपरायणा ।।65।।
पाशिनी पाशिका चापि पशुघ्नी पशुभाषिणी ।
फुल्लारविन्दवदनी फुल्लोत्पलशरीरिणी ।।66।।
परानन्दाप्रदा वीणा पशु - पाश - विनाशिनी ।
फुत्कारा फुत्परा फेणी फुल्लेन्दीवरलोचना ।।67।।
फट्मन्त्रा स्फटिका स्वाहा स्फोटा च फट्स्वरूपिणी ।
स्फाटिका घुटिका घोरा स्फटिकाद्रिस्वरूपिणी ।।68।।
वराङ्गनावरधरा वाराही वासुकी वरा ।
बिन्दुस्था बिन्दुनी बाणी बिन्दुचक्रनिवासिनी ।।69।।
विद्याधरी विशालाक्षी काशीवासिजनप्रिया ।
वेदविद्या विरूपाक्षी विश्वयुग्बहुरूपिणी ।।70।।
ब्रह्मशक्तिर्विष्णुशक्तिः पञ्चवक्त्रा शिवप्रिया ।
बैकुण्ठवासिनी देवी वैकुण्ठवासिनी ।।71।।
ब्रह्मरूपा विष्णुरूपा परब्रह्ममहेश्वरी ।
भवप्रिया भवोद्भावा भवरूपा भवोत्तमा ।।72।।
भवपारा भवधारा भाग्यवत्प्रियकारिणी ।
भद्रा सुभद्रा भवदा शुम्भदैत्यविनाशिनी ।।73।।
भवानी भैरवी भीमा भद्रकाली सुभद्रिका ।
भगिनी भगरूपा च भगमाना भगोत्तमा ।।74।।
भगप्रिया भगवती भगवामा भगाकारा ।
भगसृष्टा भाग्यवती भगरूपा भगासिनी ।।

भगलिङ्गप्रिया देवि भगलिङ्गपरायणा ।
भगलिङ्गस्वरूपा च भगलिङ्गविनोदिनी ॥76॥
भगलिङ्गरता देवी भगलिङ्गनिवासिनी ।
भगमाला भगफला भगधारा भगाम्बरा ॥77॥
भगवेगा भगा भूषा भगेन्द्रा भाग्यरूपिणी ।
भगलिङ्गाऽङ्गसम्भोगा भगलिङ्गासवावहा ॥78॥
भगलिङ्गसमाधुर्या भगलिङ्गनिवेशिता ।
भगलिङ्गसुपूजा च भगलिङ्गसमन्विता ॥79॥
भगलिङ्गविरक्ता च भगलिङ्गसमावृता ।
माधवी माधवीमान्या मधुरा मधुमानिनी ॥80॥
मन्दहासा महामाया मोहिनी महदुत्तमा ।
महामोहा महाविद्या महाघोरा महास्मृतिः ॥81॥
मनस्विनी मानवती मोदिनी मधुरानना ।
मेनिका मानिनी मान्या मणिरत्नविभूषणा ॥82॥
मल्लिका मालिका माला मालाधरमदोत्तमा ।
मदना सुन्दरी मेधा मधुमत्ता मधुप्रिया ॥83॥
मत्तहंसा समोन्नासा मत्तसिंहमहासनी ।
महेन्द्रवल्लभा भीमा माल्यञ्च मिथुनात्मजा ॥84॥
महाकाल्या महाकाली मनोबुद्धिर्महोत्कटा ।
माहेश्वरी महामाया महिषासुरघातिनी ॥85॥
मधुरा कीर्त्तिमत्ता च मत्तमातङ्गगामिनी ।
मदप्रिया मांसरता मत्तयुक्कामकारिणी ॥86॥
मैथुन्यवल्लभा देवी महानन्दा महोत्सवा ।
मरीचिर्मा रतिर्माया मनोबुद्धिप्रदायिनी ॥87॥
मोहा मोक्षा महालक्ष्मीर्महत्पदप्रदायिनी ।
यमरूपा च यमुना जयन्ती च जयप्रदा ॥88॥
याम्या यमवती युद्धा यदोः कुलविवर्द्धिनी ।
रमा रामा रामपत्नी रत्नमाला रतिप्रिया ॥89॥
रत्नसिंहासनस्था च रत्नाभरणमण्डिता ।
रमणी रमणीया च रत्या रसपरायणा ॥90॥
रतानन्दा रतवती रघूणाङ्कुलवर्द्धिनी ।
रमणारिपरिभ्राज्या रैधाराधिकरत्नजा ॥91॥
रावी रसस्वरूपा च रात्रिराजसुखावहा ।
ऋतुजा ऋतुदा ऋद्धा ऋतुरूपा ऋतुप्रिया ॥92॥
रक्तप्रिया रक्तवती रङ्गिणी रक्तदन्तिका ।
लक्ष्मीर्लज्जा च लतिका लीलालग्ना निताक्षिणी ॥93॥
लीला लीलावती लोमा हर्षाह्लादनपट्टिका ।
ब्रह्मस्थिता ब्रह्मरूपा ब्रह्माणी वेदवन्दिता ॥94॥
ब्रह्मोद्भवा ब्रह्मकला ब्रह्माणी ब्रह्मबोधिनी ।
वेदाङ्गना वेदरूपा वनिता विनता वसा ॥95॥
बाला च युवती वृद्धा ब्रह्मकर्मपरायणा ।
विन्ध्यस्था विन्ध्यवासी च बिन्दुयुग्बिन्दुभूषणा ॥96॥
विद्यावती वेदधारी व्यापिका बर्हिणी कला ।
वामचारप्रिया वह्निर्वामाचारपरायणा ॥97॥
वामाचाररता देवी वामदेवप्रियोत्तमा ।
बुद्धेन्द्रिया विबुद्धा च बुद्धाचरणमालिनी ॥98॥
बन्धमोचनकर्त्री च वारुणा वरुणालया ।
शिवा शिवप्रिया शुद्धा शुद्धाङ्गी शुक्लवर्णिका ॥99॥
शुक्लपुष्पप्रिया शुक्ला शिवधर्मपरायणा ।
शुक्लस्था शुक्लिनी शुक्लरूपशुक्लपशुप्रिया ॥100॥
शुक्रस्था शुक्रिणी शुक्रा शुक्ररूपा च शुक्रिका ।
षण्मुखी च षडङ्गा च षट्चक्रविनिवासिनी ॥101॥
षड्ग्रन्थियुक्ता षोढा च षण्माता च षडात्मिका ।
षडङ्गयुवती देवी षडङ्गप्रकृतिर्वशी ॥102॥
षडानना षड्रसा च षष्ठी षष्ठेश्वरीप्रिया ।
षडङ्गस्वादा षोडशी च षोढान्यासस्वरूपिणी ॥103॥
षट्चक्रभेदनकरी षट्चक्रस्थस्वरूपिणी ।
षोडषस्वररूपा च षण्मुखी षड्दान्विता ॥104॥
सनकादिस्वरूपा च शिवधर्मपरायणा ।
सिद्धा सप्तस्वरी शुद्धा सुरमाता स्वरोत्तमा ॥105॥
सिद्धविद्या सिद्धमाता सिद्धा सिद्धस्वरूपिणी ।
हरा हरिप्रिया हारा हरिणी हारयुक् तथा ॥106॥
हरिरूपा हरिधरा हरिणाक्षी हरिप्रिया ।
हेतुप्रिया हेतुरता हिताहितस्वरूपिणी ॥107॥
क्षमा क्षमावती क्षीता क्षुद्रघण्टाविभूषणा ।
क्षयङ्करी क्षितीशा च क्षीणमध्यसुशोभिता ॥108॥
अजाऽनन्ता अपर्णा च अहल्या शेषशायिनी ।
स्वान्तर्गता च साधूनामन्तराऽनन्तरूपिणी ॥109॥
अरूपा अमला चार्द्धा अनन्तगुणशलिनी ।
स्वविद्या विद्यकाविद्या विद्याचार्विन्दलोचना ॥110॥
अपराजिता जातवेदा अजपा अमरावती ।
अल्पा स्वल्पा अनल्पाद्या अणिमासिद्धिदायिनी ॥111॥
अष्टसिद्धि देवी रूपलक्षणसंयुता ।
अरविन्दमुखा देवी भोगसौख्यप्रदायिनी ॥112॥
आदिविद्या आदिभूता आदिसिद्धिप्रदायिनी ।
सीत्काररूपिणी देवी सर्वासनविभूषिता ॥113॥
इन्द्रप्रिया च इन्द्राणी इन्द्रप्रस्थनिवासिनी ।
इन्द्राक्षी इन्द्रवज्रा च इन्द्रमद्योक्षणी तथा ॥114॥
ईला कामनिवासा च ईश्वरीश्वरवल्लभा ।
जननी चेश्वरी दीना भेदा चेश्वरकर्मकृत् ॥115॥
उमा कात्यायनी ऊर्द्ध्वा मीना चोत्तरवासिनी ।
उमापतिप्रिया देवी शिवा चोङ्काररूपिणी ॥116॥
उरगेन्द्रशिरोरत्ना उरगोरगवल्लभा ।
उद्यानवासिनी माला प्रशस्तमणिभूषणा ॥117॥
ऊर्ध्वदन्तोत्तमाङ्गी च उत्तमा चोर्ध्वकेशिनी ।
उमासिद्धिप्रदा या च उरगासनसंस्थिता ॥118॥
ऋषिपुत्री ऋषिच्छन्दा ऋद्धिसिद्धिप्रदायिनी ।
उत्सवोत्सवसीमन्ता कामिका च गुणान्विता ॥19॥
एला एकारविद्या च एणी विद्याधरा तथा ।
ओंकारवलयोपेता ओंकारपरमाकला ॥120॥
ॐ वदवदवाणी च ॐकाराक्षरमण्डिता ।
ऐन्द्रीकुलिशहस्ता च ॐलोकपरवासिनी ॥21॥
ॐकारमध्यबीजा च ॐनमोरूपधारिणी ।
परब्रह्मस्वरूपा च अंशुकाशुकवल्लभा ॥22॥
ॐकारा अः फड्मन्त्रा च अक्षाक्षरविभूषिता ।
अमन्त्रा मन्त्ररूपा च पदशोभासमन्विता ॥123॥
प्रणवोङ्काररूपा च प्रणवोच्चारभाक् पुनः ।
ह्रींकाररूपा ह्रींङ्कारी वाग्बीजाक्षरभूषणा ॥124॥
हृल्लेखा सिद्धियोगा च हृत्पद्मासनसंस्थिता ।
बीजाख्या नेत्रहृदया ह्रींम्बीजा भुवनेश्वरी ॥125॥
क्लींकामराजा क्लिन्ना च चतुर्वर्गफलप्रदा ।
क्लींक्लींक्लीं रूपिका देवी क्रींक्रींक्रींनामधारिणी ॥126॥
कमला शक्तिबीजा ज पाशाङ्कुशविभूषिता ।
श्रींश्रींकारमहाविद्या श्रद्धा श्रद्धावती तथा ॥12

ॐ ऐं क्लीं ह्रीं श्रीं परा च क्लीङ्कारी परमाकला ।
ह्रींक्लीं श्रींकारस्वरूपा सर्वकर्मफलप्रदा तथा ।।128।।
सर्वाढया सर्वदेवी च सर्वसिद्धिप्रदा तथा ।
सर्वज्ञा सर्वशक्तिश्च वाग्विभूतिप्रदायिनी ।।129।।
सर्वमोक्षप्रदा देवी सर्वभोगप्रदायिनी ।
गुणेन्द्रवल्लभा वामा सर्वाशक्तिप्रदायिनी ।।130।।
सर्वानन्दमयी चैव सर्वसिद्धिप्रदायिनी ।
सर्वचक्रेश्वरी देवी सर्वसिद्धेश्वरी तथा ।।131।।
सर्वप्रियङ्करी चैव सर्वसौख्यप्रदायिनी ।
सर्वानन्दप्रदा देवी ब्रह्मानन्दप्रदायिनी ।।132।।
मनोवाञ्छितदात्री च मनोवृद्धिसमन्विता ।
अकारादिक्षकारान्ता दुर्गा दुर्गार्त्तिनाशिनी ।।133।।
पद्मनेत्रा सुनेत्रा च स्वधा स्वाहा वषट्करी ।
स्ववर्गा देववर्गा च तवर्गा च समन्विता ।।134।।
अन्तस्था वेशमरूपा च नवदुर्गा नरोत्तमा ।
तत्त्वसिद्धिप्रदा नीला तथा नीलपताकिनी ।।135।।
नित्यरूपा निशाकारी स्तम्भिनी मोहिनीति च ।
वशङ्करी तथोच्चाटी उन्मादी कर्षिणीति च ।।136।।
मातङ्गी मधुमत्ता च अणिमा लघिमा तथा ।
सिद्धा मोक्षप्रदा नित्या नित्यानन्दप्रदायिनी ।।137।।
रक्ताङ्गी रक्तनेत्रा च रक्तचन्दनभूषिता ।
स्वल्पसिद्धिः सुकल्पा च दिव्यचारणशुक्रभा ।।138।।
संक्रान्तिः सर्वविद्या च सस्यवासरभूषिता ।
प्रथमा च द्वितीया च तृतीया च चतुर्थिका ।।139।।
पञ्चमी चैव षष्ठी च विशुद्धा सप्तमी तथा ।
अष्टमी नवमी चैव दशम्येकादशी तथा ।।140।।
द्वादशी त्रयोदशी च चतुर्दश्यथ पूर्णिमा ।
अमावस्या तथा पूर्वा उत्तरा परिपूर्णिमा ।।141।।
खड्गिनी चक्रिणी घोरा गदिनी शूलिनी तथा ।
भुशुण्डी चापिनी बाणा सर्वायुधविभूषणा ।।142।।
कुलेश्वरी कुलवती कुलाचारपरायणा ।
कुलकर्मसुरक्ता च कुलाचारप्रवर्द्धिनी ।।143।।
कीर्तिः श्रीश्चरमा रामा धर्मायै सततं नमः ।
क्षमा धृतिः स्मृतिर्मेधा कल्पवृक्षनिवासिनी ।।144।।
उग्रा उग्रप्रभा गौरी वेदविद्याविबोधिनी ।
साध्या सिद्धा सुसिद्धा च विप्ररूपा तथैव च ।।145।।
काली कराली काल्या च कालदैत्यविनाशिनी ।
कौलिनी कालिकी चैव कचटतपवर्णिका ।।146।।
जयिनी जययुक्ता च जयदा जृम्भिणी तथा ।
स्त्राविणी द्राविणी देवी भेरुण्डा विन्ध्यवासिनी ।।147।।
ज्योतिर्भूता च जयदा ज्वालामालासमाकुला ।
भिन्नाभिन्नप्रकाशा च विभिन्ना भिन्नरूपिणी ।।148।।
अश्विनी भरणी चैव नक्षत्रसम्भवाऽनिला ।
काश्यपी विनता ख्याता दिति व दितिरेव च ।।149।।
कीर्तिः कामप्रिया देवी कीर्त्या कीर्तिविवर्द्धिनी ।
सद्योमांससमालब्ध सद्यश्छिन्नापिशङ्करा ।।150।।
दक्षिणा चोत्तरा पूर्वा पश्चिमा दिक्तथैव च ।
अग्निनैर्ऋतिवायव्या ईशान्या दिक्तथा स्मृता ।।151।।
ऊर्ध्वाङ्गऽधोगता श्वेतकृष्णा रक्ता च पीतका ।
चतुर्वणा चतुर्वर्णा चतुर्मात्रात्मिकाक्षरा ।।152।।
चतुर्मुखी चतुर्वेदा चतुर्विद्या चतुर्मुखा ।
चतुर्गणा चतुर्माता चतुर्वर्गफलप्रदा ।।153।।

धात्री विधात्री मिथुना नारी नायकवासिनी ।
सुरामुदा मुदवती मोदिनी मेनकात्मजा ।।154।।
ऊर्ध्वकाली सिद्धिकाली दक्षिणाकालिका शिवा ।
नील्या सरस्वती सा त्वं बगला छिन्नमस्तका ।।155।।
सर्वेश्वरी सिद्धविद्या परा परमदेवता ।
हिङ्गुला हिङ्गुलाङ्गी च हिङ्गुलाधरवासिनी ।।156।।
हिङ्गुलोत्तमवर्णाभा हिङ्गुलाभरणा च सा ।
जाग्रती च जगन्माता जगदीश्वरवल्लभा ।।157।।
जनार्द्दनप्रिया देवी जययुक्ता जयप्रदा ।
जगदानन्दकारी च जगदाह्लादकारिणी ।।158।।
ज्ञानदानकरी यज्ञा जानकी जनकप्रिया ।
जयन्ती जयदा नित्या ज्वलदग्निसमप्रभा ।।159।।
विद्याधरा च बिम्बोष्ठी कैलासाचलवासिनी ।
विभवा बडवाग्निश्च अग्निहोत्रफलप्रदा ।।160।।

मन्त्ररूपा परा देवी तथैव गुरुरूपिणी ।
गया गङ्गा गोमती च प्रभासा पुष्करापि च ।।161।।
विन्ध्याचलरता देवी विन्ध्याचलनिवासिनी ।
बहू बहुसुन्दरी च कंसासुरविनाशिनी ।।162।।
शूलिनी शूलहस्ता च वज्रा वज्रहरापि च ।
दुर्गा शिवा शान्तिकरी ब्रह्माणी ब्राह्मणप्रिया ।।163।।
सर्वलोकप्रणेत्री च सर्वरोगहरापि च ।
मङ्गला शोभना शुद्धा निष्कला परमाकला ।।164।।
विश्वेश्वरी विश्वमाता ललिता वसिताननना ।
सदाशिवा उमा क्षेमा चण्डिका चण्डविक्रमा ।।165।।
सर्वदेवमयी देवी सर्वागमभयापहा ।
ब्रह्मेशविष्णुनमिता सर्वकल्याणकारिणी ।।166।।
योगिनी योगमाता च योगीन्द्रहृदयस्थिता ।
योगिजाया योगवती योगीन्द्रानन्दयोगिनी ।।167।।
इन्द्रादिनामिता देवी ईश्वरी चेश्वरप्रिया ।
विशुद्धिदा भयहरा भक्तद्वेषिभयङ्करी ।।168।।
भववेषा कामिनी च भरुण्डा भयकारिणी ।
बलभद्रप्रियाकारा संसारार्णवतारिणी ।।169।।
पञ्चभूता सर्वभूता विभूतिर्भूतिधारिणी ।
सिंहवाहा महामोहा मोहपाशविनाशिनी ।।170।।
मन्दुरा मदिरा मुद्रा मुद्रा मुद्गरधारिणी ।
सावित्री च महादेवी परप्रियविनायिका ।।171।।
यमदूती च पिङ्गाक्षी वैष्णवी शङ्करी तथा ।
चन्द्रप्रिया चन्द्ररता चन्दनारण्यवासिनी ।।172।।
चन्दनेन्द्रसमायुक्ता चण्डदैत्यविनाशिनी ।
सर्वेश्वरी यक्षिणी च किराती राक्षसी तथा ।।173।।
महाभोगवती देवी महामोक्षप्रदायिनी ।
विश्वहन्त्री विश्वरूपा विश्वसंहारकारिणी ।।174।।
धात्री च सर्वलोकानां हितकारणकामिनी ।
कमला सूक्ष्मदा देवी धात्री हरविनाशिनी ।।175।।
सुरेन्द्रपूजिता सिद्धा महातेजोवतीति च ।
परा रूपवती देवी त्रैलोक्याकर्षकारिणी ।। 176।।

फलश्रुतिः

इति ते कथितं देवि पीतानामसहस्त्रकम् ।
पठेद्वा पाठयेद्वापि सर्वसिद्धिर्भवेत्प्रिये ।।177।।
इति मे विष्णुना प्रोक्तं महास्तम्भकरम्परम् ।
प्रातःकाले च मध्याह्ने सन्ध्याकाले च पार्वति ।।178।।

एकचित्तः पठेदेतत्सर्वसिद्धिर्भविष्यति ।
एकवारम्पठेद्यस्तु सर्वपापक्षयो भवेत् ।।179।।
द्विवारम्प्रपठेद्यस्तु विघ्नेश्वरसमो भवेत् ।
त्रिवारम्पठनाद्देवि! सर्वसिध्यति सर्वथा ।।80।।
स्तवस्याऽस्य प्रभावेण साक्षाद्भवति सुव्रते ।
मोक्षार्थी लभते मोक्षं धनार्थी लभते धनम् ।।181।।
विद्यार्थी लभते विद्यां तर्कव्याकरणान्विताम् ।
महित्वं वत्सरान्ताञ्च शत्रुहानिः प्रजायते ।।182।।
क्षोणीपतिर्वशस्तस्य स्मरणे सदृशो भवेत् ।
यः पठेत्सर्वदा भक्त्या श्रेयस्तु भवति प्रिये! ।।183।।
गणाध्यक्षप्रतिनिधिः कविकाव्यपरो वरः ।
गोपनीयम्प्रयत्नेन जननीजारवत्सदा ।।184।।
हेतुयुक्तो भवेन्नित्यं शक्तियुक्तः सदा भवेत् ।
य इदम्पठते नित्यं शिवेन सदृशो भवेत् ।।185।।
जीवन्धर्मार्थभोगीस्यान्मृतो मोक्षपतिर्भवेत् ।
सत्यं सत्यं महादेवि! सत्यं सत्यं न संशयः ।।186।।
स्तवस्यास्य प्रभावेण देवेन यह मोदते ।
सुचित्ताश्च सुराःसर्वे स्तवराजस्य कीर्त्तनात् ।।187।।
पीताम्बरपरीधाना पीतगन्धानुलेपना ।
मरमोदयकीर्त्तिः स्यात्परतः सुरसुन्दरि ।।188।।

।।इति श्रीउत्कटशाम्बरे नागेन्द्रप्रयाणतन्त्रे षोडशसहस्त्रे विष्णुशंकरसंवादे पीताम्बरीबगलामुखीसहस्त्रनामस्तोत्रं सम्पूर्णम्।।

।। इति हिमालयस्य उपथ्यकायां सिद्धिप्राप्तः तपश्चन्द्र चूड़ामणिः तपस्विनो कायाकल्पी सन्तप्रवरः योगाधिराजः अनन्तश्रीविभूषित ब्रह्मर्षि बर्फानी दादाजी महाराज मुनिवर्यस्य स्नेहकृपाभाजनः शिष्यवरः एवं गोरखपुर मण्डलान्तर्गत त्रिफलाग्रामातागतः सरयूद्विजः कश्यपगोत्रीय पंक्ति पावन त्रिफला पाण्डेय श्री गौर्मुख ऋषिवर्यस्यवंशजः गौराहाउपाधिपदविभूषितः बिलासपुर छत्तीसगढ़ राज्यान्तर्गतः ग्राम सकर्याम् निवासिनो द्विजकुलगौरव श्री भागीरथी गौरहा पौराणिकस्यात्मजः पण्डित श्रीधर गौरहा नामधेयेन सङ्कलितः- सम्पादितश्च महाविद्या-रत्नाकरः बगला महाविद्या दशम पटलः सम्पूर्णम् ।।

***